संस्कृतवार्ता:

23.09.2025

सायम्  - 06:20

मुख्यवार्ता:

· विश्वस्य बृहत्तमा सर्वकारीय-वित्तपोषित-स्वास्थ्य-आश्वस्ति-योजना आयुष्मान्-भारत इति अद्य सप्तवर्षाणि पूरयति। अनेन उपक्रमेण भारते सार्वजनिक-स्वास्थ्यसेवायां क्रान्तिः दृश्यते इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्।

· राष्ट्रपतिः द्रौपदी मुर्मु नवदेहली-नगरे एकसप्तति तमं राष्ट्रियचलचित्रपुरस्कारं प्राददात्। सुप्रसिद्धः अभिनेता मोहनलालः दादासाहेब-फाल्के-पुरस्कारेण सम्मानितः।

· रेल्मन्त्री अश्विनी वैष्णवः अघोषयत् यत् दीपावलि-छठ्-उत्सवेषु यात्रिकाणां सौख्यार्थं द्वादश-सहस्र-विशेष-रेलयानानि सञ्चाल्यन्ते।

· संयुक्तराष्ट्रसङ्घस्य महासभायाः अशीतितमस्य सत्रस्य उच्च-स्तरीय-संवाद: अद्य आरभ्यते। शीर्ष-प्रस्तावेषु वैश्विक-संघर्षाः तथा फिलिस्तीनदेश-मान्यता च सन्ति।

· एशिया-कप्-क्रिकेट्-क्रीडायां अद्य सायङ्काले अबुधाबी-नगरे सुपर-फोर-क्रीडायां पाकिस्तान्-देशः श्रीलङ्कादेशेन सह स्पर्धिष्यते।

आयुष्मान भारत

आयुष्मान्-भारत इति प्रधानमन्त्री-जन-आरोग्य-योजना अद्य सप्तवर्षाणि पूरयति। राञ्चीतः अष्टादशोत्तरद्विसहस्रतमवर्षस्य सितम्बर-मासे आरब्धा एषा विश्वस्य बृहत्तमा सर्वकारीय-वित्तपोषिता स्वास्थ्य-आश्वस्ति-योजना अस्ति। योजनेयं भारते स्वास्थ्यसेवायां परिवर्तनं कृतवती। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, आयुष्मान्-भारत इति योजनया भारते सार्वजनिक-स्वास्थ्यसेवायां क्रान्तिः दृश्यते । सामाजिक-प्रसार-माध्यमेन श्रीमोदी अवदत् यत्, तेन वित्तीयसंरक्षणं सम्मानं च सुनिश्चितं कृतम् । प्रधानमन्त्री अवदत् यत्, आयुष्मानभारत् इति एकः उपक्रमः अस्ति यो हि भविष्यस्य आवश्यकतानां पूर्वानुमानं कृत्वा जनेभ्यः उच्च-गुणवत्तायुतं सुलभ-स्वास्थ्यसेवाञ्च सुनिश्चेतुं केन्द्रितोऽस्ति। केन्द्रीय-स्वास्थ्य-मन्त्रिणः जगत्-प्रकाश्-नड्डा

इत्यस्य आङ्ग्ल-दैनिक-पत्रिकायां लिखितं लेखं प्रसारयन्, श्रीमोदी अवदत् यत्, "आयुष्मान्-भारत" इति सार्वत्रिक-स्वास्थ्यसेवायै जनान्दोलनस्य प्रतिज्ञा अस्ति। सः अवदत् यत्, एतत् परिवर्तनं कथं प्रत्येकं नागरिकस्य स्वास्थ्यस्य रक्षणार्थं सर्वकारस्य संकल्पस्य प्रमाणरूपेण वर्तते, अथ च राष्ट्रम् कियत् दूरं गतमिति च लेखः प्रकाशयति।

<u>सर्वश्रेष्ठनटत्वेन पुरस्कार</u>

अद्य, एकसप्ततितमे राष्ट्रियचलच्चित्रपुरस्कारसमारोहे, शाहरुख् खानाय जवान इति चलचित्राय विक्रान्तमेस्सी इत्यस्मै 12वीं फैल इत्येदर्थं च सर्वश्रेष्ठनटत्वेन पुरस्काराः प्रदत्ताः, रानी मुखर्जी इत्येषा मिसेस् चेटर्जी वर्सेस् नार्वे इति चित्रफलकाय सर्वश्रेष्ठ-अभिनेतृत्वेन पुरस्कारं प्राप्तवती। 'कठहल अ ज्याक्फ्रूट् मिस्टरी' इति सर्वश्रेष्ठहिन्दीचलचित्रस्य पुरस्कारं प्राप्तवत्। एतदतिरिच्य, सुप्रसिद्धः अभिनेता, निर्देशकः, निर्माता च मोहनलालः चलचित्रक्षेत्रे सर्वोच्च-मान्यतारूपेण दादासाहेब-फाल्के इति पुरस्कारेण सम्मानितः।

अद्य सायं चतुर्वादने नवदेहली-नगरस्य विज्ञानभवने अयं कार्यक्रमः आयोजितः।

राष्ट्रपतिः द्रौपदी मुर्मु इत्येषा विजेतृभ्यः पुरस्कारान् प्राददात्। चलचित्रनिर्माणस्य, कथा कथनस्य, अभिनयस्य च उत्कृष्टतायाः उत्सवार्थं विभिन्नेषु वर्गेषु पुरस्काराः प्रदत्ताः।

अस्मिन् अवसरे उत्पलदत्तः सर्वश्रेष्ठचलच्चित्रविमर्शकस्य राष्ट्रियचलच्चित्रपुरस्कारं असमीयभाषायाः चलच्चित्रस्य विषये तस्य विस्तृतमहत्त्वपूर्णाय च विमर्शात्मकलेखनाय प्राप्तवान्। रिम्डोगिट्टङ्गा सर्वश्रेष्ठ-गारो-चलच्चित्रस्य पुरस्कारं प्राप्नोत्। निर्देशिका शिल्पिका बोर-दो-लोयी 'मौः द स्पिरिट् ड्रीम्स् आफ् चेराव्' इति चलच्चित्राय सर्वश्रेष्ठ-प्रथम-निर्देशक-चलच्चित्रस्य पुरस्कारं प्राप्तवती।

<u>वैष्णव - रेल</u>

दीपावली, षष्ठी इत्यादिषु प्रमुखेषु उत्सवेषु बहुसंख्यकाः जनाः आगच्छन्ति। एतत् मनसि कृत्वा रेलमन्त्री अश्विनीवैष्णवः उत्सवेषु द्वादशसहस्र विशेषरेलयानानि चालयिष्यति इति घोषितवान्।

## खाद्यसम्मेलनं नड्डा

केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री जगत्-प्रकाश्-नड्डाः अद्य जनैः भोज्यमानं भोजनं सुरक्षितं स्वास्थ्यप्रदञ्च भवेदिति निश्चेतुं बहुविध-दृष्टिकोणस्य आवश्यकतायाः विषये अवधानं दत्तवान्। अद्य नवदेहल्यां वैश्विक-खाद्य-नियामक-शिखरसम्मेलने मानकचिह्नस्य, विवरणपत्रस्य च अनावरणं कृत्वा सः सम्बोधयन् आसीत्। खाद्यसुरक्षायाः मानकाः विनियमाश्च नियमितरूपेण नवीनीकृताः भवेयुः इति मन्त्री दृढतया अवोचत्। श्रीनड्डाः, भारतीय-खाद्यसुरक्षा-मानक-प्राधिकरणस्य खाद्यसुरक्षायाः मानकं वर्धयितुं अथ अस्मिन् महत्त्वपूर्णक्षेत्रे वैश्विकप्रगतिं प्रति योगदानं दातुञ्च महत्त्वपूर्णां भूमिकां स्वीकृतवान्।

## संयुक्तराष्ट्र- महासभायाः

संयुक्तराष्ट्र-महासभायाः अशीतितम-अधिवेशनस्य उच्चस्तरीयचर्चा अद्य आरभ्यते। वैश्विकसङ्घर्षस्य, फिलिस्तीनदेशस्य मान्यता च प्रमुखविषयेषु सम्मिलिताः सन्ति ।

संयुक्तराष्ट्रसङ्घस्य महासभायाः अशीतितमस्य अधिवेशनस्य उच्चस्तरीयचर्चा अद्य आरभ्यते। अस्य सत्रस्य कृते न्यूयोर्कनगरे विश्वनेतारः एकत्रिताः सन्ति। गाजा-युक्रेन-देशयोः युद्धानि, फिलिस्तीन-देशस्य पृथक् देशत्वेन वर्धमाना पाश्चात्य-मान्यता च चर्चायां प्रमुखाः विषयाः भवितुम् अर्हन्ति। अस्मिन् वर्षे विषयः अस्ति - शान्तिः, विकासः, मानवाधिकारः च एषां कृते एकत्रतानि अशीति वर्षाणि ततोपि अधिकानि च।

## जुबीन गर्ग-दाहसंस्कार

प्रसिद्धस्य असमस्य गायकस्य जुबीन गर्गस्य कामरूपजनपदे पूर्णराज्यसम्मानेन सह दाहसंस्कारः कृतः।

अद्य असमप्रदेशे लोकप्रियस्य गायकस्य जुबीनगर्गस्य पूर्णराज्यसम्मानेन सह अन्तिमः संस्कारः विहिता। अन्त्येष्ट्याम् असमस्य मुख्यमन्त्री हेमन्तबिस्वा सरमा , केन्द्रीयमन्त्री किरेन रिजिजुः, सर्वानन्द सोनोवालः च उपस्थिताः आसन्। पुरोहिताः मन्त्रोच्चारणम् कृतवन्तः, प्रशंसकाः तस्य गीतानि च गायन्ति स्म।

## पश्चिमबङ्गाल

पश्चिमबङ्गालस्य दक्षिण अंशेषु रात्रिं प्रचण्डवृष्टिः जाता। कोलकातानगरस्य समीपेषु च क्षेत्रेषु जलाप्लावे विद्युत्प्रसारेण पञ्च जनाः मृताः। पश्चिमबङ्गालस्य मुख्यमन्त्री ममता बनर्जी पर्वतीयक्षेत्राणि विहाय सर्वकारीयसहायकेषु सर्वकारीयविद्यालयेषु, बुधवासरस्य गुरुवासरस्य च अवकाशम् घोषितवती।

## ऋतुविज्ञानविभागः

भारतीय-ऋतु-विभागेनोक्तं यत् आगामीनि कतिपय दिनानि यावत् पश्चिमबङ्लस्य गाङ्गेयप्रदेशे, ओडिशा-राज्ये, छत्तीसगढ-राज्ये च अत्यधिकवृष्ट्यै नारङ्गवर्णीयसंचेतना दत्ता। आकाशवाण्या सह विशेषतया वार्तालापं कुर्वन्, ऋतुविज्ञानविभागस्य वरिष्ठः वैज्ञानिकः डा. आर्. के. जेनामणिः अवदत् यत् अस्य मासस्य सप्तविंशति दिनाङ्कात् आरभ्य दक्षिण-ओडिशा-प्रदेशे, तटीय-आन्ध्रप्रदेशे च प्रचण्डतोऽधिकवर्षा भवितुमर्हतीति।

## टैफून् रागासाः

प्रचण्ड-सागरीय-झञ्झावातेन रागासा इत्यनेन अद्य प्रातः चीनदेशस्य दक्षिणभागे आघातः कृतः, येन प्रमुख-टेक्-हब्-शेन्ज़ेन-सहितं न्यूनातिन्यूनं दश- प्रमुखनगरेषु विद्यालयाः, व्यापाराः, परिवहनसेवाः च स्थगिताः। अधिकारिणः आपत्कालिकसूचनाः दत्तवन्तः। उत्तर-फिलिपीन्स्-देशे मार्गमध्ये न्यूनातिन्यूनं त्रयः जनाः मृताः।

## क्रिकेट् - एशिया कप

एशियाकप-क्रिकेट्-क्रीडायाः सुपर-फोर इति प्रशस्त-चतुर्दलीय-चरणे पाकिस्तानस्य श्रीलङ्का-देशेन सह साम्मुख्यं भविष्यति। संयुक्त अरब अमीरातस्य अबुधाबीनगरे भारतीय समयानुसारेण सायं अष्टवादने संघर्षोऽयं समारप्स्यते। भारतम् बांग्लादेशस्य समीपे द्वौ अङ्कौ स्तः। श्रीलंकायाः पाकिस्तानस्य च समीपे सम्प्रति अङ्काभावः वर्तते।

।। इति वार्ता: ।।